# आयुर्वेदसन्दर्भे गायत्रीमाहात्म्यम्

**प्रो० हरीश्वरदीक्षितः ***

**सारांशः**

गायत्री सर्वभूतानां प्राणिनां रक्षिकाशक्तिः आयुर्वेदसन्दर्भे स्वस्थस्य स्वास्थ्यरक्षणं आतुरस्य च विकारप्रशमनं इति आयुर्वेदस्य लक्ष्यम् वर्तते। सर्वेषां भूतानां प्राणिनां स्वास्थ्यसंरक्षणे गायत्री कथं उपकारिका अस्ति, इत्येतस्य विस्तृतं विवरणं अस्मिन् शोध निबन्धे अन्तर्निहितं वर्तते।

**कुंजिका ( Keywords ) :** ॐ, भूः, भुवः, स्वः, भर्गः, धियः, धीमहि।

**Conflict of Interest : Non** **Ethical Clearance : N/A**

**गायत्री मन्त्र -** ॐ भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।
ऋषि - विश्वामित्र, देवता- सविता, छन्द- गायत्री ।

**भूमिका -**

सम्पूर्णेस्मिन् विश्वे गायत्री सर्वभूतानां संरक्षिकाशक्ति वर्तते। गायत्री मंत्रेण विशेषतः स्वास्थ्यसंरक्षणम् कर्तुं शक्यते। गायत्री वैदिकदेवस्य सूर्यस्य रश्मिशक्तिः अस्ति। सावित्री अस्य अपरा नाम् अस्ति। सावित्री कथनेनैव भगवतः भगवानभास्करस्य सूर्यस्य शक्तिबोधः भवति। अतोहि गायत्री सूर्यस्य शक्तिः अस्ति यया स्वास्थ्यसंरक्षणम् कर्तुं शक्यते।

गायत्री मंत्रस्य महिमा वेदेषु बहुविधावर्णितास्ति। आयुर्वेदे विविधेषु रोगेषु यथा कैंसर इत्यादि रोगेषु विकिरणचिकित्सा क्रियते। एवमेव प्राकृतिकचिकित्साविज्ञाने आयुर्वेदे सूर्यस्यरश्मिभीः विकिरणचिकित्साविधीयते। सूर्यस्यरश्मयः प्राणिनां आरोग्यं कुर्वन्ति। एतस्मात् यत सम्पूर्णस्य लोकस्य प्रकाशकः देवतासूर्यः स एव आयुर्वेदे प्राकृतिकचिकित्सकः अस्ति। प्राकृतिकचिकित्सायाः वर्णनं कायचिकित्सासन्दर्भे चरकसंहितायां एवं च शल्यतंत्र सन्दर्भे सुश्रुतसंहितायां आधारभूतरूपेण दृश्यते।

वैदिकसन्दर्भे शास्त्राणां सम्पत्तिस्वरूपा वेदानां माता गायत्र्यैव मन्यते। निश्चिततः चतुर्णां वेदानामुत्पत्ति एतदस्मादभवत्। वेदशब्दस्यार्थः- 'ज्ञानः'। ज्ञानस्य चत्वारः भेदाः सन्ति-ऋक्, यजुः सामथर्वादि। गायत्र्याः गर्भस्थज्ञानमत्यन्तविशुद्ध- सर्वाङ्गपूर्ण-परिमार्जिमस्ति यद् व्यक्तिविशेषसय लोक परलोकं शान्तिप्रदं निर्मातुं शक्नोति।

**गायत्र्येव मता माता वेदानों शास्त्रसम्पदाम् ।**
**चत्वारोऽपि समुत्पन्ना वेदास्वस्या असंशयम् ॥**

गायत्री सकलज्ञानवैभवभूत भगवान् वेदस्य मातृस्वरूपास्ति। नित्यसिद्धपरमेश्वरी ज्ञान-विज्ञानस्य मूर्तिः द्विजातिमात्रस्याराध्या देवी अस्ति। भगवती गायत्री दैहिक, दैविक, भौतिक, त्रिविधतापहन्त्री पराविद्या स्वरूपा, कामधेनुरिव सकल बल-बुद्धि-विद्या-ऐश्वर्य-तेज तथा परम कल्याणस्य प्रदात्री अस्ति। ऋषिः-महर्षिः-यतिः मुनिः सन्त रूपस्वी शैव शाक्त वैष्णवाश्च समस्तम सम्प्रदायानामविरोधाराध्या अस्ति।

**गायत्री वेदमाताऽस्ति साऽऽद्या शक्तिर्मता भुवि।**
**जगतां जननी चैव तामुपासेऽहमेव हि ॥**

**महर्षिवेदव्यासेनोक्तम् -** यथा पुष्पाणां सारमधुः पयसां सारधृतः रसानां सारपयः तथा गायत्री समस्तवेदानां सारः। शास्त्रोक्तमन्त्रेषु गायत्रीमन्त्रमहिमा सर्वातिशायी अस्ति। गायत्री माहात्म्यं वेद-उपनिषद्-पुराण-धर्मशास्त्रेषु च

* आचार्यः, वेदविभागस्य, संस्कृविद्याधर्मविज्ञानसङ्कायस्थ, काशीहिन्दूविश्वविद्यालयस्य, वाराणसी

विस्तरेणोपलभ्यते। मन्त्रं तु ऋक्यजुः साम-अथर्वादि समस्त- वैदिक संहितासु विस्तरेण वर्णितमस्ति।

**गायत्र्याः नामकरण 'गुरुमन्त्र' :-**

'गायन्तं त्रायते' इति गायत्री तथा 'सवितुरपत्यं इति सावित्री' अतः द्वौ व्युत्पत्त्यनुसारं मुख्य द्वौ नाम्नी स्तः। यस्याः ऋचायाः जप-कीर्त्तन-गान-ध्यानेन व उपासकक्लेशबहुल भवसागरात् तरन्ति अथवा या स्वकीयं अनन्योपासकं तारयति। प्रकृतेर्दुःखदासक्तया ज्ञान-विवेक-वैराग्येन मोचयित्वा, जीवात्मां स्वकीयं परमरक्षकानन्दकन्द माता, पिता, गुरु-सखाभिः सह संयोजयति। जाबालः सत्यकामादि मुनिकुमारौ बुद्धिशोधकस्य मन्त्रस्यानुष्ठानेन ज्ञानवानाप्तकामं निर्मितम्आस्ताम्। ऋषेः कथनं यत् गायत्र्याः अनुष्ठानं करणं वेदवक्ता विद्वद्भिः कुलैः कोऽपि अब्रहमवित् न भवति।

तस्मात्कालात् प्रभृति वैदिक वाङ्मयस्य ज्ञाता ईदृशः विश्वासः ईदृशी श्रद्धा-धारणांच निक्षिप्यन्ते यद्वेदत्रयीसाररूपपरमपावनमन्त्र गायत्री एवास्ति।

**गायत्र्याः महनीयता -**

मन्त्रद्रष्टाऋषयः गायत्रीमाध्यमेन किमपश्यत् अजानत् प्राप्नोत् च? इमाः तेषाम् रचितग्रन्थेषु तेषामेव शब्दाः प्रकटी कुर्वन्ति। यथा-

छान्दो0 प्रपा03, खं 12 संक्षेपास्ति- 'यद्वा गायत्री' शब्दाः समस्त ब्रह्मवाणी वेदत्रयी अस्या वाचकोऽस्ति। गायत्र्याः तेजसा शुद्ध ज्ञानवती बुद्धिः स्थावर-जङ्गमपदार्थानां यथार्थबोधयति। अनेन प्रकारेण पदार्थज्ञाने माध्यम-द्वारमात्रमेवास्ति। स्वयमेव स्थावर-जङ्गमात्मकं नास्ति। विश्वस्य समस्त वाग्भिः गायत्र्यां समीहन्ते। हस्य परिज्ञानं गायत्र्याः मन्थनं तस्मिन् संयमेन भवति।

'सर्वभूत' आधारा धरित्र्याः सममेव गायत्री सर्वासां छन्दसामाधारः। सर्वाछन्दांसि गायत्र्याः अधीना सन्ति। यथा कोऽपि पृथ्वी लङ्ध्य अस्याः बहिर्न तिष्ठति एवमेव गायत्र्यामुपासकस्य सर्वाभावनाः शुभकामनाः एकीभूता निहिता। एवं जीवात्मायाः पार्थिव शरीरेषु प्रतिष्ठितं प्राणान् सममेव गायत्र्याम् 'धर्म' प्रतिष्ठितम्। यथा या प्राणां देहपरित्यज्यान्यत्र न स्थातुं शक्नोति प्रत्युत् शरीरे स्थित्वा (तिष्ठ्य) उषित्वा रक्षन्ति तथैव गायत्री त्यक्त्वा 'धर्म' अन्यत्र न प्रतिष्ठितम् गायत्र्यां उसित्वा सा उपासकस्य गायत्र्या रक्षति- 'रक्षा-कवच सम गायत्रीं न लङ्धयति। (लङ्ध्य कार्ये समर्थो न भवति)।

पुरूषे देहं गायत्री स्वरूपमेवास्ति अन्तः शरीरे 'हृदयं' गायत्री स्वरूपमस्ति। यथा हृदयाधारे सूक्ष्मप्राणेन जीवन स्थितिंच हृदयं प्राणेन न त्यज्यते। पुरूषस्य रक्षति एतदेव गायत्री अपि उपासकस्य जीवनस्याधारः रक्षकः च। गायत्र्या त्रयः चरणाः चतुर्विश अक्षराणि तस्याः मुखसमेव सन्ति। सा तैः मुखैः परमपुरूषस्य गौरवगाथां कुर्वते (करोति) तथापि सम्पर्णूवर्णनं न कर्तुं शक्यते। एतत्सर्वाणि अक्षराणि ब्रह्मप्राप्तेः द्वारं सन्ति गायत्र्याः मुखानि, शब्दैः ब्रह्मबोधकाः सन्ति।

**गायत्री -छन्द महिमा -**

गायत्री स्त्री नापितु चतुर्विंश अक्षराणि नाम एकः छन्दः वर्तते। अथर्ववेदस्य कां., 19, अनुवाक 3, सूक्त 21, मं0 अनुसार चतुर्वेदाः (चत्वारः वेदाः- गायत्री उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः त्रिष्टुप् जगतीइत्यादि सप्तछन्दासु आबद्धाः। अस्याः अपि अष्ट-अष्टभेदात् 7×8=56 प्रविभागं भवन्ति। अतः गायत्री स्त्री नापितु नाम युक्ता छन्द गायत्री एव। अतः नानाविधैः वस्त्राभूषणैरलकृता नारी रूपेण यः प्रददाति सः अबुधजनाः सन्ति ते पण्डिताः न कथ्यन्ते। गायत्रीं पौराणिकाः एव वस्त्राभूषणैः सुसज्जिता नारीरूपमददात् । यथा- देवानाम् ब्रह्मा, विष्णुः मेहशश्च एषां शक्तीनां सरस्वती, लक्ष्मी, पार्वती एवमाद्याशक्तिः रूपे एकं विचित्रं रूपं मन्यन्ते। तथैव सविता-सूर्यस्य' रश्मीनेव नारीरूपा स्वीकृत्य अस्याराधना कुर्वते। अवश्यमेव मन्त्रं जपन्नेव भगवन्तं मातृरूपे स्मरणे कोऽपि आपत्तिर्न प्रतीयते।

'चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातः सवनम्'[1] तथा अष्टाक्षर छंह वा एकं गायत्र्यै पदम्'[2]

**'गायत्री' वा 'सावित्री' -**

यस्याः प्रत्येकपादे अष्ट अक्षराणि सन्ति त्रिपदा कथ्यते च तस्यै एव इदृशी उक्तिं यत् - 'वाग् वै गायत्री' - गायत्री

समग्र वेदवाणीं गायति। गायत्र्यां 'गाय'-'त्री' द्वौ पद्वौ स्तः। 'गय' नाम प्राणानां सर्वासामन्द्रियाणां चापि अस्ति। 'त्रै' स्त्रीलिंङ्ग 'त्री' निर्मीयते अतः सर्वान् प्रणावेगान् इन्द्रियांच 'प्रज्ञा'एवं कुमार्गगामी पथेनाभिरक्षति। उपासकस्य रक्षति अतएव सर्वोत्तमा एव मन्यते। यथा -

'अग्निमीके पुरोहितम् यज्ञस्य देवमृत्विजम्' एतत्प्रकारेण गायत्री महिमा वर्तते। 'गय' प्राणस्यास्ति।' आत्म शक्ति जागरित्वा तम् प्रबुद्धप्रबृद्धंच कृत्वा तेषां गयानां प्राणानां गायत्री रक्षाकुर्वाणं समर्थो भवति। इयमुपदेष्टा गुरुशिष्योः तयोः रक्षति। सावित्र्यां उपदेष्टां 'प्रतिग्रहस्य' दूषणाःपापस्यस्पर्शः च न भवति। तस्याः तपः तेजसा दोषौ भस्मीभूतं भवति। वेदः अस्ति माता यस्याः ईदृशी इयं वेदसुता गायत्री। इयं आद्याशक्ति जगज्जननी अपि कथ्यते।[3] ज्ञानीजन गायत्रीं भूलोकस्य 'कामधेनुः' प्रकल्प्यते। विश्वः अस्याश्रयगृहीत्वा लोक परलोकस्य ऐश्वर्यं प्राप्तु शक्नोति[4]। बुधाः समस्तानां यौगिकसाधनानां मूलाधारः एतामेव मन्यन्ते[5]। 'गायत्री पंचाङ्ग' अनुसारेण तेषां युगानां सर्वश्रेष्ठसिद्धीनेवाधिगच्छति। 'तमस्' प्रधान कालेऽपि 'गायत्री' एव तपः योगश्च सिद्वीनां माताऽपि मन्यते। गायत्र्यातिशयेन अन्य कमपि ध्यानं-साधनं च न वर्तते।

**गायत्री तात्पर्य भावः -**

'ॐ भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।' अर्थात् 'यः सर्वेषां रक्षकः विश्वस्य प्राणः सर्वदुःखनाशकः सर्वसुखप्रदायकः च परमेश्वरः अस्ति। सः सर्वव्यापक, सर्वसर्जकः सर्वश्रेष्ठः सर्वग्रह्द्वातु समर्थः शुद्धस्वरूपः दिव्यगुणैः युक्त देवस्याहं ध्यानं करोमि। यः अस्माकं बुद्धिमुत्तमं प्रचोदयात्। रूपे वर्णितम् अस्य महनीयताव्यापकतायारेव प्रमाणं यत् मनुस्मृतौ (2/81) गायत्री वेदानां मुखं मन्यतेएवप्रशस्यते। सविता देवतायाः प्रार्थनाप्रयुक्त अस्मिन् मन्त्रे रहस्यमयी सूक्तयः सन्निहिताः सन्ति। तदापि विश्वस्य जनमानसाः स्वदैनिकव्यवहारे यत्र स्थानं प्रददाति तत्रापि अस्य बुद्धिवर्धकमन्त्रमपि मन्यन्ते। अस्य मन्त्रस्य संचरणशीलता व्यापकता परिलक्ष्यते यत् वैदिककाले सृजित मन्त्रः अद्य प्रत्येक यूवांवृद्धानां मुखारविन्दात् निःसृतः प्रस्फुटितः च। शौचादिकार्यात् निवृत्ताः स्नानाद्योपरान्तभगवत्स्मरणं करोति।

मनुस्मृतिकारेण मन्त्रस्य महनीयता-उपादेयतायाः चमत्कृत् भूत्वा उक्तम् - बुद्धिर्जानेन शुद्धयति। योगशास्त्रमपि कथ्यते-

**'दृष्टा दृशिमात्रशुद्धोऽपि प्रत्ययानुपश्य'**

अर्थात् चेतना-जीवात्मा-द्रष्टा-शक्तिः अस्ति तथापि बुद्धिवृत्यनुसारेण द्रष्टा।

**'गायत्री प्रत्यग्ब्रह्मैक्य बोधिका'**

अर्थात् गायत्री प्रत्यक्ष अद्वैत ब्रह्मबोधकास्ति। विश्वस्य जन्मदात्री प्रकृतिः विश्वस्य पोषकः पुरूषः। पितुः स्थानेन मातुः स्थानंतुसर्वश्रेष्ठाःसर्वोत्तमाः भवति इति।

स्पष्टतः सिद्धं यत् गायत्री मन्त्रस्य शुद्धोच्चारणेन मानवः स्वबुद्वि यत्र सात्विकतायुक्तं कुर्वते तत्र शुदूबुद्ध्या सम्पृक्त मानवः स्वप्रत्येककार्येषु पाटवार्जनेन सह पथभ्रष्टोऽपि न भवति।

**सन्दर्भ -**

1. छान्दोग्योपनिषद् 33/17/1
2. बृहदारण्यकोपनिषद् 35/14/1
3. गायत्री वेदमाताऽस्ति साऽऽद्या शक्तिर्मता भुवि। जगतां जननी चैव तामुपासेऽहमेव हि।
4. भूलोकस्य गायत्री कामधेनुः बुधैः लोक आश्रयेणेनामुं सर्वमेवाधिगच्छति।
5. यौगिकानां समस्तानां साधनानां तु हे प्रिये। गायत्र्येव मता लोके मूलाधारविदां परैः।

❐